दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-140 | 1 | मार्च 20, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ वसन्त-ऋतुः
सूर्यः उत्तरायणः चैत्र कृष्ण षष्ठी
तिथिः चैत्र 7 प्रविष्टांशः मङ्गलमयः भवेत्

2 पंजाबप्रदेशे हिमाचलबसयानानां पूर्णसुरक्षा भविष्यति मुख्यमंत्री सुक्खुः मुख्यमंत्रिणा भगवन्तमानेन सह दूरभाषेण भाषितवान्

3 KKSU: कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालये अनुवाद- अध्ययनविषये एकदिवसीय- राष्ट्रीयसम्मेलनस्य आयोजनम्

4 हिमाचलम् इ-पाठ्यक्रमनिर्माणे भविष्यति सर्वोत्कृष्टं राज्यम्- रजनी सांख्यायन

## सर्वकारेण स्वीकृता आतङ्कवादं विरुध्य शून्यसहिष्णुतायाः नीतिः



हिमसंस्कृतवार्ताः-आतङ्कवादं विरुध्य शून्यसहिष्णुतायाः नीतिः सर्वकारेण स्वीकृतास्ति, येन देशे आतङ्कवाद-घटनासु महती न्यूनता सञ्जातास्तीति, राज्यसभायाम् उत्तरं ददन् गृहराज्यमन्त्री नित्यानन्दरायः उक्तवान् यत् केन्द्रसर्वकारः देशात् आतङ्कवादस्य उन्मूलनार्थं कठोराचरणं कुर्वन् अस्ति। सः अवदत् यत् देशात् बहिः अपि आतङ्कवादसम्बद्धानां घटनानां क्रियाकलापानाञ्च अन्वेषणार्थंम् अधिकशक्तियुतं राष्ट्रियनिरिक्षाभिकरणं सर्वकारेण सुदृढं कृतमिति। सः अवदत् यत् एन. आई. ए. इत्याभिकरणं लंदन नगरस्थे भारतीय उच्चायोगे सैन फ्रांसिस्को इत्यत्र भारतस्य महावाणिज्य दूतावासे च जाताक्रमणयोः संबंधितघटनानाम् अन्वेषणं कुर्वदस्ति।

## पञ्जाब-प्रान्तस्य कृषकाणाम् उपवेशनम् सम्पन्नम्



हिमसंस्कृतवार्ताः-पञ्जाब-प्रान्तस्य कृषकाणाम् उपवेशनम् सम्पन्नम् उपवेशनमिदं चण्डीगढ़म् इति केन्द्रशासितप्रदेशे केन्द्रराज्यसर्वकारयोः प्रतिनिधीनां मध्ये होरात्रयात्मकमासीत्। संयुक्त-किसानमोर्चा इति किसान- मजदूर-मोर्चा इति संघयोः निर्मातृणां अष्टाविंशतिः कृषक संघानां प्रतिनिधिभिः समं केन्द्रीयकृषिमन्त्री शिवराजसिंह चौहान इत्यस्य चर्चा जाता। उपवेशनेऽस्मिन् वाणिज्यमन्त्री पीयूषगोयलः, उपभोक्तुप्रकरणानां मन्त्री प्रह्लादजोशी च उपस्थितौ आस्ताम्।

## पञ्चत्रिंशदुत्तर-द्विसहस्रतमवर्षं यावत् भारतस्य स्वकीयम् अन्तरिक्ष-स्थानकं भविष्यति

**हिमसंस्कृतवार्ताः-** भारतदेशः पञ्चत्रिंशदुत्तर-द्विसहस्रतमवर्षं यावत् अन्तरिक्ष-स्टेशनम् इति नाम्ना स्वकीयम् अन्तरिक्ष-स्थानकम् भवेत् इति धिया योजनां निर्मापयन्नस्ति। सर्वाः अपि योजनाः यदि सुचारुतया ससमयं सम्पन्नाः भविष्यन्ति तर्हि चत्वारिंशदधिक-द्विसहस्रवर्षं यावत् भारतीय- अन्तरिक्षयात्री चन्द्रमसि भविष्यति। इति प्रधानमन्त्री कार्यालय राज्यमन्त्री डॉ. जितेन्द्रसिंहः लोकसभाया एकस्य पूरक प्रश्नस्योत्तरे अवदत्। अनेन प्रोक्तम् यत् चन्द्रयान-४ इत्येतत् द्वाभ्यां प्रक्षेपणयनाभ्यां प्रक्षेपयिष्यते, अपि चास्मिन् घटकपञ्चकम् भविष्यति। गगनयानाय चिताः चत्वारः यान्त्रिणः जनसम्पर्कात् दूरं किमर्थं स्थापिताः सन्तीति प्रश्नस्योत्तरे सः उक्तवान् यत ते एतदर्थं जनसम्पर्कात् वारिताः सन्ति,





यतो हि तेषां चित्तवृत्तयः नियन्त्रिताः स्युः, येन तेषां सम्पर्कः तादृशेभ्यः वस्तुभ्यः गतिविधिभ्यः वा न भवेत् येन तेषां चित्तवृत्तयः विचलिताः भवितुं शक्नुवन्तीति। तेनोक्तं यत् वर्षान्तं यावत् एकया महिला रोबोट इत्यनया साकं गगनयानस्य परीक्षणोद्गमनं समारप्स्यते।

## केन्द्रीयप्रशासनेन अल्पमूल्यात्मकानां यू. पी. आई. इति माध्यमेन दीयमानानां धन- दानादानानां प्रोत्साहनाय पञ्चदशशतकोटि- रूप्यकाणां प्रोत्साहनयोजना स्वीकृता

हिमसंस्कृतवार्ताः- केन्द्रीय- प्रशासनेन अल्पमूल्यात्मकानां यू. पी. आई. इति माध्यमेन दीयमानानां धन- दानादानानां प्रोत्साहनाय पञ्चदशशतकोटि- रूप्यकाणां प्रोत्साहनयोजना स्वीकृता। असमप्रदेशस्य नामरूप इत्यत्र उर्वरक संयंत्रस्य स्थापनाय स्वीकृतिः च प्रदत्ता। इति राज्यसभायां स्वास्थ्यमन्त्रिणा जगत्प्रकाशनड्डा इत्यनेन प्रोक्तम्।





## सुभाषितम्

**गुणवत् जनसंसर्गात्,**
**याति नीचोऽपि गौरवम्।**
**पुष्पमालाप्रसङ्गेन,**
**सूत्रं शिरसि धार्यते॥**

भावार्थः- हमें हमेशा गुणवान् और सज्जन व्यक्तिओं के साथ रहना चाहिए, क्योंकि गुणवान् व्यक्ति के साथ नीच व्यक्ति भी गौरव पाता है, जैसे सुगन्ध युक्त पुष्पमाला के साथ साथ रहकर वह सूत्र (धागा) भी किसी के सिर पर पहुंच जाता है और गौरव पाता है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक- अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## अन्तरिक्षयात्रिणौ सुनीता विलियम्स, बुच विल्मोर इत्येतौ नवमासम् यावत् अन्तरिक्षक्षेत्रे यापयित्वा धरायां प्रत्यावर्तितौ

**हिमसंस्कृतवार्ताः-** नासा इत्यस्य अन्तरिक्षयात्रिणौँ सुनीता विलियम्स, बुच विल्मोर इत्येतौ षड्शीत्यधिक- द्विशतदिनानि यावत् अन्तरिक्षक्षेत्रे समाप्य गतप्रातः स्पेसएक्स कू-ड्रेगन इत्यस्मिन् अन्तरिक्षयाने समारुह्य धरायां प्रत्यावर्तितौ। तयोः यानम् अन्यैः सहयात्रिभिस्समं अमेरिकायाः खात्यां पैराशूट्स इत्येतेषां सहयोगेन अवतरितम्। अनेनैव सह अन्तरिक्षयात्रिभिः सह नासायाः निकहेग रूसदेशस्य अलेक्जेण्डर गोरखुनोव इत्येताभ्याम् अपि स्वकीया यात्रा समापिता। एतेषां समेषां धरायामपि जीवनं सुकरं सामान्यञ्च भवेदिति मत्वा पञ्चचत्वारिंशद्दिवसात्मकः पुनर्वासकार्यक्रमः समारब्धोऽस्ति।

### राष्ट्रपति-द्रौपदीमुर्मु प्रधानमन्त्री नरेन्द्र मोदी च सुनीतायाः प्रत्यावर्तनाय नासा इत्यस्मै वर्धापनानि अयच्छताम्

हिमसंस्कृतवार्ताः-प्रधानमन्त्रिणा नरेन्द्रमोदिना एते सर्वेऽपि अन्तरिक्षयात्रिणः वर्धापिताः प्रशंसिताश्च, सहैव हि तेन तेषामपि प्रशंसा कृता येषां सत्प्रयासैः अन्तरिक्षयात्रिणां सुरक्षिततया धराधाग्रि प्रत्यावर्तनं सुकरं जातम्। सामाजिक- प्रसारतन्त्रजाले प्रसारिते सन्देशे प्रधानमन्त्रिणा उक्तं यत् सुनीता विलियम्स इत्यनया सह क्रू- ९ इत्यस्य अन्तरिक्षयात्रिभिः पुनरेकवारं सिद्धीकृतं यत् दृढतायाः वास्तविकं तात्पर्य किम्भवतीति। अनन्त-अज्ञात शून्यस्य सम्मुखे तेषां दृढसङ्कल्पः सर्वदैव लक्षशः जनान् सम्प्रेरयिष्यति। सुनीता विलियम्स इत्यस्याः भावनाः प्रयासाञ्च समुट्टङ्कयन् प्रधानमंत्री उक्तवान् यत् तया स्वकीये सम्पूर्ण जीवने वृत्तौ च एतत् उदाहरणत्वेन प्रस्तुतं यत् कथं तस्याः भावनाः सन्ति, कथञ्च सत्प्रयासैः सा सम्बलिता अस्तीति। **महामहिम राष्ट्रपतिः द्रौपदी-मुर्मु इत्यनया क्रू- ९ इत्यभियानस्य धरायां कुशलतया प्रत्यावर्तनाय नासा इत्यस्य सर्वमपि दलं वर्धापनानि सन्ति प्रेषितानि। सामाजिक- सञ्चारतन्त्रजाले प्रसारिते एकस्मिन् सन्देशे राष्ट्रपतिना प्रोक्तं यत् भारतस्य पुत्र्या सुनीता विलियम्स इत्यनया, तस्याः सहयात्रिभिश्च स्वस्य दृढतायाः, समर्पणस्य, कथमपि पराजयं न स्वीकरिष्यामीति भावनायाः च परिचयो दत्तः।**

# पंजाबप्रदेशे हिमाचलबसयानानां पूर्णसुरक्षा भविष्यति


## मुख्यमंत्री सुक्खुः मुख्यमंत्रिणा भगवन्तमानेन सह दूरभाषेण भाषितवान्



सांकेतिकं चित्रम्

**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः पञ्जाबे हिमाचलबसयानानि पूर्णसुरक्षां प्राप्स्यन्ति इति उक्तवान्। असौ अकथयत् यत् अहं पञ्जाबस्य मुख्यमन्त्रिणा भगवन्तमानेन सह दूरभाषेण भाषितवान्, सः च सुरक्षितं वातावरणं प्रदातुं आश्वासितवान्। उभयराज्यस्य डीजीपी स्तरे अपि अस्मिन् विषये वार्ता भविष्यति। मुख्यमन्त्री सभायाम् अवदत् यत् पञ्जाबः अस्माकम् अग्रजः अस्ति। बसयानेषु शिलापातं कृत्वा उपद्रवं जनयतां जनानां विरुद्धं समुचितकार्यविधिः भविष्यति इति मुख्यमन्त्री भगवन्तमानः आश्वासितवान्। मुख्यमंत्री सुक्खुः अवदत् यत् वयं सर्वेषां धार्मिकगुरुणां सम्मानं कुर्मः, परन्तु वातावरणस्य दूषणं अनुचितं भवति। अवधेयं वर्तते यत् पञ्जाबतः हिमाचलं प्रति आगच्छतां द्विचक्रीयवाहनानां विषये राज्यपुलिसस्य प्रतिबन्धितध्वजैः सह भ्रमणं कृत्वा कृतस्य विरोधस्य नामधेयेन पञ्जाबदेशे कोलाहलः आरब्धः अस्ति। खरड़े खालिस्तान-समर्थकाः एचआरटीसी-बसयानं स्थगयित्वा शिलापातेन तेषां वातायनानि मुकुराणि च भग्नानि।

# जलजीवनमिशने केन्द्रात् ११६ कोटिरूप्यकाणां स्थाने केवलं ३७ कोटिरूप्यकाणि एव प्राप्तानि- उपमुख्यमंत्री



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** उपमुख्यमन्त्री मुकेश अग्निहोत्री इत्यनेन उक्तं यत् २०२४-२५ तमवर्षे जलजीवनमिशनस्य केन्द्रसर्वकारात् ११६ कोटिरूप्यकाणि हिमाचलसर्वकारेण प्राप्तव्यानि आसन्, येषु एतावता केवलं ३७ कोटिरूप्यकाणि एव प्राप्तानि सन्ति। शेषं धनं प्राप्तुं राज्यसर्वकारः प्रयत्नाः कुर्वन् अस्ति। भाजपाविधायकस्य बलवीरवर्मा इत्यस्य प्रश्नस्य उत्तरं दत्त्वा उपमुख्यमन्त्री उक्तवान् यत् चौपाल निर्वाचनक्षेत्रे जलशक्तिविभागे १५२ कोटिरूप्यकाणां कार्याणि प्रचलन्ति। जलजीवनमिशनस्य ६५ कोटिरूप्यकाणां कार्यस्य प्रस्तावः अस्ति। क्षेत्रे लम्बितकार्यं सम्पन्नं कर्तुं १०० कोटिरूप्यकाणां आवश्यकता वर्तते। धनं प्राप्यमाणमात्रेण एतानि कार्याणि सम्पन्नानि भविष्यन्ति।

# HP Vidhan Sabha Budget Session:

## हिमाचलस्य चिकित्सा- महाविद्यालयेषु भविष्यन्ति नवदेहली- एम्सस्तरीयाः सुविधाः- मुख्यमंत्री





सांकेतिकं चित्रम्

**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् एकवर्षस्य अन्तः राज्यस्य प्रत्येकस्मिन् पीएचसी मध्ये वैद्याः उपलभ्यन्ते। वैद्यानां परिचारिकाणां च पदानां सृजनं भविष्यति। वैद्यानां युक्तिकरणमपि भविष्यति। दिल्ली एम्सस्य पङ्क्तौ चिकित्सामहाविद्यालयेषु सुविधाः प्रदत्ताः भविष्यन्ति। मुख्यमन्त्री उक्तवान् यत् व्यवस्थायाः परिवर्तने आह्वानानि सन्ति। वयं ४० वर्षपुरातनानि प्रणालीः परिवर्तयामः। आगामिषु १५ दिनेषु पैरा चिकित्साकर्मचारिणां पुनर्गठनं भविष्यति। बुधवासरे प्रश्नसमये भाजपाविधायकौ जनकराजः, रणधीरशर्मा च स्वास्थ्यसंस्थासु रिक्तपदानां विषयं उत्थापितवन्तौ। सः पृष्टवान् यत् राज्ये एमबीबीएस- बीडीएस- इत्येतयोः रिक्तपदानि कदा पूरयिष्यन्ते इति। श्रीनैनादेव्याः विधायकः रणधीरशर्मा अपि एमबीबीएस वैद्यानां रिक्तपदं पूरयितुं विषयम् उत्थापितवान्। विपक्षस्य नेता जयरामठाकुरः अवदत् यत् पूर्वं परिसरात् अपि वाक-इन साक्षात्कारस्य प्रावधानम् आसीत्। वयं एकदा एव ५०० पदानि निर्माय ३०० पदानि पूरितवन्तः। २०० पूरणस्य प्रक्रिया आरब्धा। वर्तमानसर्वकारे एकः अपि वैद्यः नियुक्तः नास्ति। परन्तु स्वास्थ्यमन्त्री डॉ. धनीरामशाण्डिलः अवदत् यत् सर्वकाराः निरन्तरतायां सन्ति। पदानि पूरयितुं सर्वैः प्रयत्नाः कृताः। अहं तांदीं दृष्टवान् यत् चतुर्थश्रेण्याः कर्मचारी स्वास्थ्यसंस्थायाः प्रभारी आसीत्। सर्वेषां पदानां पूरणस्य प्रक्रिया प्रचलति इति मन्त्री अवदत्। स्वास्थ्यमन्त्री धनीरामशाण्डिलस्य उत्तरे विपक्षस्य विधायकाः असन्तुष्टिं प्रकटयित्वा प्रश्नैः पूरकप्रश्नैः च वाक्प्रहारं कृतवन्तः। अस्मिन् विषये मुख्यमन्त्री उक्तवान् यत् राज्यस्य सर्वेषु चिकित्सामहाविद्यालयेषु एम्स् दिल्ली इत्यस्य पङ्क्तौ सुविधाः प्रदत्ताः भविष्यन्ति। वृद्धानां कृते तेषां द्वारे एव स्वास्थ्यसेवाः प्रदातुं बजटे व्यवस्था कृता अस्ति। आईजीएमसी शिमलायां २०-२० वर्षीयाणि एमआरआई-यन्त्राणि स्थापितानि सन्ति। पूर्वसर्वकारे एतेषु परिवर्तनं न कृतम्। वयं व्यवस्थां परिवर्तयामः।

# जाइकासमितौ सम्मिलिताः भविष्यन्ति विधायकाः- चन्द्रकुमारः

कृषिमन्त्री चन्द्रकुमारचौधरी इत्यनेन उक्तं यत् जाइका इत्यस्य कृते गठितसमितिषु सम्बन्धितक्षेत्रस्य विधायकाः समाविष्टाः भविष्यन्ति। परियोजनानां कार्यप्रणालीविषये विधायकाः अवगताः भवेयुः। विधायकेन नीरजनैय्यर इत्यनेन उत्थापितस्य प्रश्नस्य उत्तरं दत्त्वा कृषिमन्त्री उक्तवान् यत् कार्यसम्बद्धे विधायकैः सह परामर्शः क्रियते। शीघ्रमेव सर्वकारः एतादृशी व्यवस्थां करिष्यति। सः अवदत् यत् जाइका-अन्तर्गतं चम्बा-नगरे ७.९५ कोटिरूप्यकाणां कार्याणि प्रचलन्ति। अस्याः परियोजनायाः अवधिः चतुर्वर्षम् अस्ति।

# उद्यानकार्यस्य पर्यटनस्य च विषये सर्वकारेण अधिकं ध्यानं दातव्यं भविष्यति- प्रतिभासिंह



**हिमसंस्कृतवार्ताः- शिमला।** राज्यकाङ्ग्रेसस्य अध्यक्षा प्रतिभासिंह अवदत् यत् राज्यसर्वकारेण बजटे निर्वाचनप्रतिज्ञाभ्यः प्राधान्यं दत्तम्। परन्तु उद्यानपालनक्षेत्रे पर्यटनक्षेत्रे च सर्वकारेण अधिकं कार्यं कर्तव्यम्। एतयोः द्वयोः अपि विशेषं प्रावधानं बजटे भवितुमर्हति स्म। यदि पर्यटनं राज्यस्य आर्थिकमेरुदण्डः अस्ति तर्हि उद्यानविज्ञानं विकासाय महत्त्वपूर्णं आयस्य स्रोतः अस्ति। सा बुधवासरे सुन्दरनगरे पत्रकारैः सह वार्तालापं कुर्वती आसीत्। सा अवदत् यत् राज्यसर्वकारः राज्यस्य अर्थव्यवस्थायाः उन्नयनार्थं प्रयतते। एतदतिरिक्तं संस्थायाः सुदृढीकरणाय कार्यकर्तृभिः सह विचाराः स्पष्टाः भविष्यन्ति। प्रत्येकं कार्यकारिणीं निर्मातुं पूर्वं सम्पूर्णा प्रतिक्रिया गृहीता भविष्यति। तदनन्तरं एव उत्तरदायित्वं दलस्य सक्रियनेतृभ्यः समर्पितं भविष्यति। मण्डी- संसदीय- निर्वाचनक्षेत्रात् सांसद- कङ्गना- रणौत-महोदयायाः अनुपस्थितेः विषये पृष्टा सा अवदत् यत्, स्वसंसदीय-निर्वाचनक्षेत्रे आगन्तुं वा न वा इति तस्याः इच्छा एव। सा अवदत् यत् यदा सा सांसद आसीत् तदा मण्डी-संसदीय-क्षेत्रस्य आपदासु जनानां सुख-दुःखयोः सदैव उपस्थिता आसीत्। अधुना सांसदः कङ्गना रणौत अस्ति। सा कुत्र कथं गन्तव्यमिति निर्णयं करिष्यति। सा पञ्जाबतः आगच्छन्तः पर्यटकाः विधिव्यवस्थायाः स्थितिं दूषयन्ति इति चिन्ताम् प्रकटितवती। अस्मिन्नवसरे पूर्वसंसदीयसचिवेन सोहनलालठाकुरेण सह अनेके पदाधिकारिणः कार्यकर्तारश्च उपस्थिता अभवन्।

# KKSU: कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालये अनुवाद- अध्ययनविषये एकदिवसीय- राष्ट्रीयसम्मेलनस्य आयोजनम्




**हिमसंस्कृतवार्ताः- नागपुरम्।** कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयस्य संस्कृत- असंस्कृतभाषाविभागेन २४ मार्च २०२५ दिनाङ्के सोमवासरे एकदिवसीयं राष्ट्रियसम्मेलनम् आयोज्यते। "भारतीय- ज्ञान- व्यवस्थायाः परिप्रेक्ष्ये अनुवादाध्ययनम्" इति विषये सम्मेलने केन्द्रीय- संस्कृत- विश्वविद्यालयः नवदेहलीतः आर्थिकसहायता प्राप्ता ॥ अनुवाद-अध्ययनं अध्ययनस्य स्वतन्त्रशाखारूपेण विकसितम् अस्ति ॥ अनुवादः विज्ञानस्य कलानां च संयोजनम् अस्ति। अन्यभाषायाः शास्त्रीयग्रन्थानां साहित्यिकग्रन्थानां च अनुवादं कुर्वन् अनुवादकस्य परीक्षणं भवति। यद्यपि अनुवादकार्यम्, अनुवादकः, भाषाप्रवीणता च महत्त्वपूर्णा अस्ति तथापि शास्त्रीयसाहित्यग्रन्थानान् अनुवादे याः समस्याः सन्ति, आवश्यकानि भाषाकौशलानि इत्यादीनि अपि महत्त्वपूर्णानि सन्ति। अस्य सम्मेलनस्य आयोजनस्य उद्देश्यम् अनुवादक्षेत्रे विचारविश्लेषणसमस्यानां विषये रचनात्मकविमर्शः भवति।

अस्याः परिषदः उद्घाटनसमारोहे प्रसिद्धः संस्कृतविद्वान्, कविः, साहित्यविशेषज्ञः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य निदेशकः प्रो. रमाकान्तपाण्डेयः मुख्यातिथिरूपेण: उपस्थितः भविष्यति। उद्घाटनसमारोहस्य अध्यक्षता कुलपतिः प्रो. हरेरामः त्रिपाठी करिष्यति। विश्वविद्यालयस्य पूर्व-अधिष्ठाता प्राध्यापकः नन्दपुरी, विशेषातिथिरूपेण च प्रख्यातविद्वान् महान् संस्कृतकविः, संस्कृत- अकादमी- हैदराबाद- निदेशकः च प्राध्यापकः मधुसूदन पेन्ना उपस्थिताः भविष्यन्ति। उद्घाटनसमारोहे कुलसचिव डॉ. देवानंदशुक्लः एवं रामटेकपरिसरस्य निदेशकः प्रो. हरेकृष्णः अगस्ती मञ्चे विशेषरूपेण उपस्थिताः भविष्यन्ति। सम्पूर्णभारतात् संस्कृतप्राध्यापकाः विद्वांसः च अस्मिन् सम्मेलने भागं गृहीत्वा शोधपत्राणि प्रस्तोष्यन्ति।

# आभासीयमाध्यमैः सम्पद्यमानानां द्यूत-क्रियाकलापानां निवारणे महत्त्वपूर्णः परिष्कारः अभवत्-सूचनाप्रसारणमन्त्री



हिमसंस्कृतवार्ताः। सूचनाप्रसारणमन्त्री अश्विनी वैष्णवः उक्तवान् यत् आभासीयमाध्यमैः सम्पद्यमानानां द्यूत-क्रियाकलापानां निवारणे महत्त्वपूर्णः परिष्कारः अभवत्। गतवर्षे सप्त-नवत्यधिकैकसहस्रं यावत् द्यूत-अन्तर्जालानि प्रतिबन्धितानि आसन्। लोकसभायां पूरकप्रश्नानाम् उत्तरं ददन् सः अवदत् यत् केन्द्रं राज्यं च एतादृशानां क्रियाकलापानां निवारणाय मिलित्वा कार्यं कर्तव्यं भवति, आन्तर्जालिकापराधसम्बद्धाः च सर्वे विभागाः समन्वयेन कार्यं कुर्वन्ति। सः अवदत्, आन्तर्जालीय नकारात्मकप्रभावानां विषये समाजे जागरूकता आगच्छतीति।

# नागपुरे हिंसायाः अनन्तरं बृहद्सुरक्षाप्रबन्धनानि, प्रशासनेन सम्पूर्णे क्षेत्रे कर्फ्यू इति घोषितम्

नागपुरः- सोमवासरे रात्रौ हिंसायाः अनन्तरं दङ्गाग्रस्तक्षेत्रेषु प्रशासनं सुरक्षां नियोजितवान् इति कारणेन बुधवासरे नागपुरस्य बृहत्भागेषु बैरिकेडड्, कर्फ्यू च अभवत्। अशान्तिसम्बद्धे बजरङ्गदलस्य, विहिपस्य च अष्टसदस्याः सहितं ७८ जनाः पुलिसैः गृहीताः। दङ्गानां योजनाकारः इति पुलिसैः चिह्नितः ३८ वर्षीयः फहीम खानः नगरस्य स्थानीयक्षेत्रे स्वगृहे प्रदोषपूर्वं अन्वेषितः।

# असमप्रदेशस्य मूख्यमन्त्रिणः साहाय्यपूजितः विश्वविद्यालयस्य कृते लोकयानं समर्पणम्



**हिमसंसकृतवार्ता - नलबारी, असम।** असमप्रदेशस्य नलबारीजनपदे स्थिते कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयस्य कृते स्थानीयविधायकेन जयन्तमल्लबरुवादेवस्य हस्तक्षेपेन मूख्यमन्त्रिणः साहाय्यपूजितः 32 लक्षपरिमितस्य धनस्य एकं लोकयानं विश्वविद्यालाय समर्पितम्। विधायकबरुवायै विश्वविद्यालयपक्षतः विंशतिः संख्यकानाम् अभावानामुल्लेखपूर्वकम् एकं पत्रं दत्तमासीत्। तस्य पत्रस्य अभावेषु एतद् लोकयानमपि अन्यतमम् आसीत्। यानं प्राप्य विश्वविद्यालयस्य कुलसचिवेन विधायकवर्याय धन्यवादं विज्ञाप्य आगामिनिकाले विश्वविद्यालयस्य कार्यकर्तृभ्यः छात्रेभ्यः च विभिन्नसमये उपयोगाय यानमिदं साहाय्यं भविष्यति इति उक्तम्।

# विदेशमंत्री डॉ. एस जयशंकरः रायसीना-संवादं सम्बोधितवान्



हिमसंस्कृतवार्ता- विदेशमन्त्री डॉ. एस. जयशंकरः अद्य नवदिल्ल्यां पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य रायसीना-संवादे राष्ट्रियसुरक्षायाः चिन्तेति विषयमधिकृत्य सम्बोधितवान्। वैश्विक- आर्थिकरणनीतिषु परिवर्तनं प्रकाशयन् सः अवदत् यत् साम्प्रतिकं विश्वं राष्ट्रिय सुरक्षायां ध्यानं दत्वा वाणिज्यिक-निर्णयान् स्वीकरोतीति यद्धि इतः पूर्वं नाभवत्। डॉ. जयशंकरः आरेखितवान् यत् इदानीं देशाः केवलं व्ययप्रभावशीलतायाः अपेक्षया सुरक्षित- विश्वसनीय- सहभागितायां प्राथमिकतायाः ध्यानं कुर्वन्ति। भारतस्य वाणिज्यिकविमर्शस्य चर्चा कुर्वन् सः अवदत् यत् भारतदेशः अधुना यूरोपीयसङ्घस्य, यूके, अमेरिकादेशैः सह त्रीणि बृहत्व्यापारसंवादेषु संलग्नः अस्तीति।

बुर्काविक्रेता, द्विचक्रिकासुधारकः आपणस्वामिनः पुत्रः खानः २०२४ तमे वर्षे लोकसभानिर्वाचने केन्द्रीयमन्त्री नितिनगडकरीविरुद्धं सहस्रमतं प्राप्तवान् आसीत्सः। सोमवासरे गणेशपेठपुलिसस्थानकं प्रति आन्दोलनकारिणां समूहस्य नेतृत्वं कृत्वा महाराष्ट्रस्य छत्रपतिसम्भाजीनगरमण्डले मुगलसम्राटस्य समाधिस्थलस्य निष्कासनस्य आग्रहं कृत्वा प्रदर्शनेषु औरङ्गजेबस्य प्रतिमां धार्मिकचादरं च दग्धं इति बजरङ्गदलस्य विहिपसदस्यानां च विरुद्धं याचिकां दतवान्। स्थानाकात् निर्गत्य किञ्चित्कालानन्तरं खानः एकं चलचित्रं रिकार्ड् कृतवान् यत् सः पुलिसदलं प्रदर्शकानां रक्षणं कृत्वा अल्पसंख्यकायोगस्य अध्यक्षस्य आलोचनां कृतवान्। एतत् चलचित्रं शीघ्रमेव सामाजिकमाध्यमेषु प्रसरितः अभवत्, यस्य कारणात् आरएसएस-मुख्यालयात् केवलं २ कि.मी दूरे स्थिते मध्यनागपुर-परिसरस्य महल-नगरे दङ्गानां कारणम् इति पुलिसदलेन अन्वेषितम्।

# या संस्कृता धार्यते

कोरिडे विश्वनाथ शर्मा,
धर्मपुरी तेलंगाणा 9849608311




यस्यां वेदचतुष्टयं विलसितो ज्ञानांबुराशेर्निधिः
यद्वेदांतमणिः प्रदीपयति हि ब्रह्मैक तत्त्वं परम्
या वाग्दर्शनवाङ्मयी शुभकरी ज्ञानैकसिद्धिप्रदा,
भाषा सा मधुरा विकासजननी या संस्कृता धार्यते. १

❋❋❋❋❋❋❋❋❋❋❋❋❋❋

यद्गीर्वाणवरस्वहृद्गतवचो भावं त्वभिव्यज्यते,
या वाल्मीकिपराशरात्मजपदा पौराणिका व्याहृता,
यावाग् ज्योतिषशास्त्ररश्मिनिवहा विज्ञानवृद्धिप्रदा
भाषा सा मधुरा विकासजननी या संस्कृता धार्यते. २

❋❋❋❋❋❋❋❋❋❋❋❋❋❋

याऽऽयुर्वेदनिबोधिता विलसिता ह्यारोग्यसंवर्धिनी,
या छेत्र्याधितेतः सामनिगमा संगीतगानामृता,
यस्यां श्री भरतोक्तनर्तनकळा लोकैः सुनीराजिता
भाषा सा मधुरा विकासजननी या संस्कृता धार्यते. ३

❋❋❋❋❋❋❋❋❋❋❋❋❋❋

छेत्र्याधितेतः - छेत्री (छेतृ - स्त्री) +
आधि(मनोवेदनानां) ततेः

❋❋❋❋❋❋❋❋❋❋❋❋❋❋

यन्मन्वादिसुवाचितस्मृतिचयैः संरक्ष्यते धारिणी,
कांतासम्मितकाळिदासकवनैः लोकः सन्निर्दिश्यते
यस्यां पाणिनिना निबद्धनियमैः सांकेतिकं धिक्कृतम्
भाषा सा मधुरा विकासजननी या संस्कृता धार्यते, ४

❋❋❋❋❋❋❋❋❋❋❋❋❋❋

या प्रापंचिक वाक्समूहचयिनां राज्ञीति गीः कीर्त्यते
यस्यां हैंदव संस्कृतिर्विलसिता लोकेन संपूज्यते
यस्याः प्राकृत भाषया विकसिते बौद्धीय जैनीयके
भाषा सा मधुरा विकासजननी या संस्कृता धार्यते ५

❋❋❋❋❋❋❋❋❋❋❋❋❋❋

## "लौकिकन्यायकोशः"
## "एकदेशविकृतन्यायः"

कस्यापि प्राणिनः शरीरस्य कश्चन भागः खण्डितः नष्टः वा भवति चेदपि सः प्राणी स एव भवति न अन्यः। तस्य मूलरूपे परिवर्तनं न भवति। कस्यापि शुनकस्य कर्णः छिन्नः लाङ्गूलं वा छिन्नं तथापि सः शुनकः एव भवति अश्वः वा गर्दभः वा न भवति। {एकदेशविकृतम् अनन्यवत् इति व्याकरणस्य परिभाषा वर्तते- छिन्ने अपि पुच्छे श्वा श्वा एव भवति न गर्दभः इति। {परिभाषेन्दुशेखरे ३७}

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

हिमसंस्कृतवार्ताः

# उपनिषद्
## रहस्यम्- ०३

यः मनुष्यः ज्ञानरूपिणीं विद्यां, तथा कर्मरूपिणीम् अविद्यां च तत्त्वेन जानाति, एवं वेदं यथार्थतः अवगच्छति, सः अविद्यया अर्थात् कर्मानुष्ठानेन मृत्युं तीर्त्वा विद्यया अमृतम् अश्नुते, अर्थात् अविनाशिनम्, आनन्दमयं परब्रह्म-पुरुषोत्तमं प्रत्यक्षं प्राप्नोति।

यः नानाफलाकाङ्क्षी मनुष्यः विनाशशीलानां देवपितृणाम् उपासनां करोति, सः अज्ञानरूपं घोरान्धकारं प्रविशति। एवं यः अविनाशिनः परमेश्वरस्य उपासनायां बहिर्दृष्ट्या रतः स्यात्, परं तस्य उपासनाप्रसङ्गे मिथ्याभिमानः स्यात् तर्हि सः इतोऽपि अधिकतरम् अन्धकारं प्रविशति। अविनाशिनः ब्रह्मणः उपासनया एकतरं फलं प्राप्यते, परम् विनाशशीलानां देवपितृणाम् उपासनया अन्यतरं फलं प्राप्यते इति धीरपुरुषाः मनुष्यान्, अस्मान् प्रति वा सविस्तरम् अकथयन्।



यः मनुष्यः अविनाशिनं परमेश्वरम्, विनाशशीलान् देवादीन्, तथा वेदं यथार्थतः जानाति, सः तेषां देवादीनाम् उपासनया मृत्युं तरति, तथा च अविनाशिनः परमेश्वरस्य उपासनया अमृतम् अश्नुते, अर्थात् सः अविनाशिनं परब्रह्म-परमेश्वरं प्रत्यक्षं प्राप्नोति। सर्वेषां पालकः, पोषकः च परमेश्वरः हि वर्तते। सः सत्यस्वरूपः, सर्वेश्वरः, चास्ति। तस्य श्रीमुखं ज्योतिर्मयेन सूर्यमण्डलरूपपात्रेण आच्छादितम् अस्ति। परन्तु भक्तिरूपं सत्यधर्मं च अवलम्ब्य यः तम् उपासते, तस्मै भक्ताय स्वदर्शनप्रदानाय तदावरणम् परमेश्वरः स्वयम् अपसारयति। तस्मै परमात्मने नमः! (ईश०/११-१५)



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# ओ वासिते, ओ वासिते


M - ओ वासिते, ओ वासिते
F - ओ महिमन्, ओ महिमन्
M - ओ वासिते, ओ वासिते
F - ओ महिमन्, ओ महिमन्
M - मेलिष्ये त्वाञ्च, वक्ताहे
कीदृग् प्रीये अहम्
F - मेलिष्ये त्वाञ्च, वक्ताहे
कीदृग् प्रीये अहम्
M - ओ वासिते, ओ वासिते
F - ओ महिमन्, ओ महिमन् -- (००)

F - कीदृग्गता रात्रिः
कीदृग्गतं दिनं
कीदृग् प्रीये विरतौ
कीदृग्स्मरे आसम्
M - सर्वतो वैरह्यम्, अश्रुधारा ब्रूते
सायं प्रातः नूनं, कीदृग् "स्मरे हि/स्मरये" त्वाम्
ओ वासिते, ओ वासिते
F - ओ महिमन्, ओ महिमन्
M - ओ वासिते,ओ वासिते - (०१)

M - स्वीयादृशे त्वां हि, धारये शन्नु हे
हार्दिक्यस्पन्देऽपि त्वाञ्च अगोपये
मय्यनु क्रान्तता, त्वां वै ज्ञापये
दृत्वा हि हृदयं, त्वाञ्चापि दर्शये
M - ओ वासिते, ओ वासिते
F - ओ महिमन्, ओ महिमन्
M - मेलिष्ये त्वाञ्च, वक्ताहे
कीदृग् प्रीये अहम्
F - मेलिष्ये त्वाञ्च, वक्ताहे
कीदृग् प्रीये अहम्
M - ओ वासिते, ओ वासिते
F - ओ महिमन्, ओ महिमन् -- (०२)

हिमसंस्कृतवार्ताः

रचयिता -
डॉ. रुरुकुमारमहापात्रः
(अध्यापकः)
राष्ट्रियसंस्कृत-
विश्वविद्यालयः, तिरुपतिः



(Sanskrit Version of Hindi film song-
ओ साहिबा, ओ साहिबा)

# हिमाचलम् इ-पाठ्यक्रमनिर्माणे भविष्यति सर्वोत्कृष्टं राज्यम्- रजनी सांख्यायन




हिमसंस्कृतवार्ताः डॉ.अमनदीपशर्मा सोलनम्। हिमाचलप्रदेशस्य राज्यशैक्षणिकानुसन्धानं प्रशिक्षणपरिषदि सोलने पञ्चदिवसीय शिक्षकाणां प्रशिक्षणकार्यशालायाः आयोजनं क्रियते। कार्यशालेयं 17 मार्चतः 21 मार्चपर्यन्तं चलिष्यति। कार्यशालायाः तृतीये दिवसे पञ्जाबविश्वविद्यालयस्य प्रशिक्षकेन अनुजगुप्ता इत्यनेन एच5पी इत्यस्मिन् विषये विस्तारपूर्वकं व्याख्यायितं किञ्च तस्य प्रायोगिकं पक्षमपि कारितम्। तेनोक्तं यत् शैक्षणिकचित्रेषु चलचित्रेषु च कथं छात्राः सुरुचिपूर्णतया योजनीया इति समयस्य आवश्यकता वर्तते किञ्च छात्राणाम् अधिकतया शैक्षणिककार्येषु सहभागिता भवेत् एतदर्थं प्रयत्नः विधेयः। कार्यशालायाः द्वितीये सत्रे आई.टी क्षेत्रे सिद्धदक्षेण मनीषतोमरवर्येण प्रतिपादितं यत् कथं स्लोमोशन इत्यस्य प्रयोगेण कथं एनिमेशनाधारितं चलचित्रं निर्मातुं शक्यते। अस्मिन्नवसरे फ्लिपक्लिप, एनीमेकर इत्यादीनां नूतनप्रोद्योगिकीनां प्रायोगिकम् अभ्यासं शिक्षकैः कारितम्। प्रशिक्षणकार्यशालायाम् आगतेन विज्ञानविषयस्य शिक्षकेन राजनवर्येणोक्तं यत् एससीइआरटी द्वारा प्रशिक्षणस्य यत् प्रारूपं निर्मितमस्ति तत् निश्चयेन शिक्षकाणां समग्रविकासस्य दिशि क्रान्तियुक्तः निर्देशः भविष्यति। तेन एससीइआरटी इत्यस्य प्राचार्यायाः, कार्यक्रमसंयोजिकायाः मंगेशकुमार्याः विशेषं धन्यवादं ज्ञापितं यैः एतादृशं प्रशिक्षणं कल्पितम्। एससीइआरटी परिषदः प्राचार्याः रजनीसांख्यायनः उक्तवती यत् हिमाचलम् इ-पाठ्यक्रमनिर्माणे सर्वोत्कृष्टं राज्यं भवेत् एतदर्थम् अस्माकं प्रयासाः नितरां प्रचलन्ति येन निश्चयेन लक्ष्यसाधना भविष्यतीति।